M. T. B. COLLEGE, SURAT
Manuscripts Library
No. Ref. / Ser. 198
Title: Shiva Kavacha Vidhi
Patra

198

Shiva Kavacha Vidhi	Title
	Author
	Editor
	Year, Vols.
	Publisher
198	Remarks

शिवकव० ॥श्रीगणेशायनमः॥ अथशिवकवचविधिः॥ कार्तिकेमार्गशिर्षेवामाघेवैशाखसंज्ञिते॥श्रावणेबहु
॥१॥ लेपक्षेजयस्यारंभणंकुरु॥ एकादशशतंकुर्यादेकादशसहस्रतः॥ एकादशंतुलक्षंवाजयःकुर्यात्प्रय
त्नतः॥ उत्तममध्यमप्रोक्तंकनिष्टंचशुचौदेशेसमासीनोयथावत्कल्पितासना॥ जितेंद्रियाजितप्राणं
श्चिंतयेच्छिवमव्ययं॥ एवं अथप्रयोगः॥ देशकालौसंकीर्त्यममइहजन्मनिजन्मांतरेचानिखिलदुरितदो
षनिरसनपूर्वकं अपमृत्युदुःस्वप्नदुर्निमित्तग्रहभूतप्रेतपिशाचब्रह्मराक्षसादिबाधाशांत्यर्थंपुत्रपौत्रादि अनवच्छिन्नसं
ततीस्थिरलक्ष्मीप्राप्त्यर्थंशत्रुपराजयसदाभिष्टसंसिध्यर्थंश्रीसांबसदाशिवप्रीत्यर्थंअमुकसंख्य
याशिवकवचसहस्रवर्णोक्तमंत्रजपशिवपंचाक्षरेणसंपुटितंअमुककामनास्वयंब्राह्मणद्वाराश्रीसां
बसदाशिवप्रीत्यर्थंअमुकसंख्याकंपुरश्चरणंकरिष्ये॥इतिसंकल्प्य॥ आदौनिर्विघ्नतासिध्यर्थंग
णपतिपूजनंपूर्वकंस्वस्तिपुण्याहवाचनंमातृकापूजनंनांदीश्राध्धंआचार्यादिऋत्विक्वरणंकरिष्ये
॥उक्तरित्याकुर्यादित्युक्त्वाप्रार्थयेत्॥ ततःआचार्यः॥ यजमानेनसहजपस्थानंशिवालयेरागत्याचम्य
प्राणानायम्यदर्भान्धारयमाणोदेशकालौसंकीर्त्यपूर्वसंकल्पितजपसंख्यापरिपूर्णार्थंप्रतिदिन ॥१॥
मष्टोत्तरशतावृत्तिसंख्यशिवकवचमंत्रजपमहंकरिष्ये॥ गणपतिंनत्वाअमोक्तप्रकारेणासन

विधिंभूतशुध्यादिपवनपावनांतमात्मशुध्धिंविवेकेनप्रोक्ष्य॥ स्वस्त्ययनंतार्क्ष्यमितिमंत्रद्वयंपठेत्
॥तत्कर्त्तोक्तिनमासंकुर्यात्॥ तद्यथा॥ ततोमूलेनाचम्यमूलेनप्राणायामं॥त्रयंकुर्यात्॥ न्यासमा
रभेत्॥ अस्यश्रीशिवकवचमंत्रस्यशंभुऋषिःश्रीसांबसदाशिवोदेवता॥ अनुष्टुप्छंदः॥ महेशा
येतिबीजं॥ गौरीशक्तिः॥ शर्वायेतिकिलकं॥ श्रीसांबसदाशिवप्रीत्यर्थेन्यासेविनियोगः॥ ॐशं
भवेऋषयेनमःशिरसि॥ ॐ अनुष्टुप्छंदसेनमःमुखे॥ ॐश्रीसांबसदाशिवोदेवतायनमः॥ हृ
द्ये॥ ॐमहेशायेतिबीजायंगुह्ये॥ ॐ गौरीशक्तयेनमःपादयोः॥ ॐशर्वायकिलकायनमः॥ स
र्वांगे॥ ॐ ज्ञानात्मनेनमः॥ अंगुष्टाभ्यांनमः॥ ॐगुरवेनमः॥ तर्जनीभ्यांनमः॥ ॐअगोचरायनमः
॥मध्यमाभ्यांनमः॥ ॐ ईश्वरायनमः॥ कनिष्टिकाभ्यांनमः॥ ॐस्थिरधन्वनेकरतलकरपृष्टा
भ्यांनमः॥ एवंहृदयादि॥ प्रणवेनदिग्बंधंकृत्वा॥ अग्नयेहृदयायनमः॥ त्र्यंबकायशिरसि॥ त्रि
नेत्रायशिखायै॥ वसिष्ठायकवचायहुं॥ अनुष्टुप्छंदसेनेत्रत्रयायवौषट्॥ ॐरुद्रदेवतायै
अस्त्रायफट्॥ अथदिग्न्यासः॥ ॐदुंदुर्गायैप्राच्येदिशंबध्नामि॥ ॐविंविनायकायनमःदक्षि

णदिशं ॥ ॐ नंनंदिकेश्वरायनमः ॥ प्रतीच्यैदिशं० ॥ ॐ क्षंक्षेत्रपालायनमः उदीची० ॥ ॐ धंधर्मराजा
कव० यनमः सर्वादिग्भ्यो० ॥ अथमंत्रतंत्रग्रंथेअयंविशेषः ॥ ॐ ब्रह्मणेपादयोः ॥ ॐ विष्णवेहृदि० ॐ महेश्व
२॥ राय० शिरसि ॥ ॐ सप्तर्षिभ्यः शिखायां० ॥ ॐ अश्वीभ्यांश्रोत्रयोः ॥ ॐ शशिभास्कराभ्यां० चक्षुषि
॥ ॐ सरस्वत्यै० जिव्हायां ॥ ॐ अग्नये० ॥ वाचि ॥ ॐ मरुद्भ्यो० दंतपंक्तौ ॥ ॐ हव्यवाहनाय० जठरे ॥ ॐ
गंधर्वाप्सरोभ्यः पादयोः ॥ ॐ महामेरुरथेभ्यो० हृदयंकंजकर्णिकायां ॥ ॐ अंअष्टवसुभ्योनमः ॥ वा
महस्ते ॥ ॐ एकादशरुद्रेभ्योनमः दक्षिणहस्ते ॥ ॐ द्वादशादित्येभ्योनाभ्यां ॥ ॐ अष्टभैरवेभ्योन
मः सर्वांगे ॥ अथशिवपंचाक्षरन्यासः ॥ ॐ वामदेवायनमः शिरसि ॥ ॐ ऋषये० मुखे ॥ ॐ पंक्ति
छंदसेहृदयायनमः ॥ ॐ श्रीसांबसदाशिवोदेवतायै० गुह्ये ॥ ॐ बीजायनमः पादयोः ॥ ॐ उमा
शक्तयेनमः सर्वांगे ॥ ॐ विं अनामिकाभ्यां० ॥ ॐ वांकनिष्ठिकाभ्यां ॥ ॐ यंकरतलकरपृष्ठाभ्यां० ॥
एवंहृदयादि ॥ ॐ नमः शिवायेतिमंत्रेणमस्तकादिपादांतंसर्वांगेएकादशवारंन्यसेत् ॥ अथकवचो
क्तेनद्वादशांगन्यासः ॥ ॐ सद्योजाताय० दक्षिणपादे ॥ ॐ अघोराय० वामपादे ॥ ॐ पशुपतयेदक्षि ॥२॥
णजानुनि ॥ ॐ शर्वायवामजानुनि ॥ ॐ विरूपायदक्षिणकक्ष्यां ॥ ॐ विश्वरूपाय० वामकक्ष्यां ॥ ॐ

त्र्यंबकायदक्षिणहस्ते ॥ ॐ कपर्दिने० वामहस्ते ॥ ॐ भैरवाय० दक्षिणांसे ॥ ॐ शूलपाणये० वामांसे ॥ ॐ ईशा
नाय० मूर्ध्नि ॥ ॐ महेशाय० सर्वांगे ॥ ॐ पंचवक्त्राय० इतितर्जन्यंगुष्ठयोगेनेदिग्बंधनंकुर्यात् ॥ अथध्यानं ॥ हस्ता
भ्यांकलशद्वयामृतरसैराप्लावयंतंशिरोद्वाभ्यांतौदधतंमृगाक्षवलयेद्वाभ्यांवहंतंपरं ॥ अंकंन्यस्तकरद्वयाम
तघटंकैलासकांतंशिवंस्वस्थांभोजगतानवेंदुमुकुटंदेवंत्रिनेत्रंभजे ॥१॥ श्रीसांबवृषारूढंहिरण्यबाहुंहिरण्य
रूपंपरशुपाशविमोचकंपुरुषंकृष्णपिंगलमूर्ध्वरेतसंविरूपाक्षंविश्वनःसहस्राक्षंसहस्रशीर्षंसहस्रचरणं
विश्वतोबाहुंविश्वात्मानमेकमद्वैतंनिष्कलंकंनिर्गुणंशांतंशिवमक्षरव्ययंहरिंहिरण्यगर्भादिसहस्राक्षरमद्रे
यमनाद्यंतंशिवंमृगटंकाभयवरांशुच्छूव्याघ्राजिनांबरंचूडंत्रिनेत्रंपंचवक्त्रंशिवंभजेत् ॥ इतिध्यानं ॥ अहंशि
वःशिवःसोहमितिचेतसिचिंतयेत् ॥ पंचोपचारैःपूजयेत् ॥ लंपृथिव्यात्मनेगंधंपरिकल्पयामि ॥ हंआकाशा
त्मकंपुष्पं० यंवायवात्मकंधूपं० रंवह्न्यात्मकंदीपं० वंअमृतात्मकंनैवेद्यं० लंहंयंरंवंसर्वात्मकंतांबुलंपरिक
ल्पयामि ॥ अहमस्मीशिवोहमस्मीब्रह्माहमस्मीतिभावयेत् ॥ अथजपेत् ॥ अथापरंसर्वपुराणगुह्यं
निःशेषपापौघहरंपवित्रं ॥ जयप्रदंसर्वविपत्प्रनाशंवक्ष्याभिशैवंकवचंहितायते ॥१॥ ऋषयुवाच ॥ न
मस्कृत्यमाहादेवंविश्वव्यापिनमीश्वरं ॥ वक्ष्येशिवमयंवर्मसर्वरक्षाकरंन्नृणां ॥१॥ शुचौदेशेसमासीनो

यथावत्कल्पितासनः ॥ जितेंद्रियो जितप्राणश्चिंतयेच्छिवमव्ययं ॥ २ ॥ हृत्पुंडरीकांतरसंनिविष्टं स्वतेजसा
व्याप्तनभोवकाशं ॥ अतींद्रियं सूक्ष्ममनंतमाद्यं ध्यायेत्परानंदमयं महेशं ॥ ३ ॥ ध्यानावधूताखिलकर्मबंधः
श्चिरं चिदानंदनमग्नचेताः ॥ षडक्षरन्याससमाहितात्मा शैवेन कुर्यात्कवचेन रक्षां ॥ ४ ॥ मां पातु देवोखिलदेव
तात्मा संसारकूपे पतितं गभीरे ॥ तन्नामदिव्यं वरमंत्रमूलं धूनोतु मे सर्वमघं हृदिस्थं ॥ ५ ॥ सर्वत्र मां रक्षतु वि
श्वमूर्तिर्ज्योतिर्मयानंदघनश्चिदात्मा ॥ अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशेषात् ॥ ६ ॥ यो
भूस्वरूपेण बिभर्ति विश्वं पायात्स भूमेर्गिरिशोष्टमूर्तिः ॥ योपांस्वरूपेण नृणां करोति संजीवनं सोवतु मां ज
लेभ्यः ॥ ७ ॥ कल्पावसाने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिलीलः ॥ स कालरुद्रोवतु मां दवाग्नेर्वात्या
दिभीतेरखिलाच्च तापात् ॥ ८ ॥ प्रदीप्तविद्युत्कनकावभासो विद्यावराभीतिकुठारपाणिः ॥ चतुर्मुखस्त
त्पुरुषस्त्रिनेत्रः प्राच्यां स्थितो रक्षतु मामजस्रं ॥ ९ ॥ कुठारवेदांकुशपाशशूलकपालढक्काक्षगुणान्दधानः ॥
चतुर्मुखो नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्यां ॥ १० ॥ कुंदेंदुशंखस्फटिकावभासो वेदाक्षमा
लावरदाभयांकः ॥ त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजातोवतु मां प्रतीच्यां ॥ ११ ॥ वराक्षमालाभयटंक
हस्तः सरोजकिंजल्कसमानवर्णः ॥ त्रिलोचनश्चारुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः ॥ १२ ॥ वेदा ॥३॥

भयेष्टांकुशपाशशूलकपालढक्काक्षरशूलपाणिः ॥ सितद्युतिः पंचमुखोवतान्मामीशान ऊर्ध्वं परमप्रकाशः ॥
॥ १३ ॥ मूर्धानमव्यान्मम चंद्रमौलिर्भालं ममाव्यादथ भालनेत्रः ॥ नेत्रे ममाव्याद्भगनेत्रहारी नासां सदा रक्षतु वि
श्वनाथः ॥ १४ ॥ पायाच्छ्रुती मे श्रुतिगीतकीर्तिः कपोलमव्यात्सततं कपाली ॥ वक्त्रं सदा रक्षतु पंचवक्त्रो जिह्वां सदा
रक्षतु वेदजिह्वः ॥ १५ ॥ कंठं गिरीशोवतु नीलकंठः पाणिद्वयं पातु पिनाकपाणिः ॥ दोर्मूलमव्यान्मम धर्मबाहुर्वक्ष
स्थलं दक्षमखांतकोव्यात् ॥ १६ ॥ ममोदरं पातु गिरींद्रधन्वा मध्यं ममाव्यान्मदनांतकारी ॥ हेरंबतातो मम पा
तु नाभिं पायात्कटिं धूर्जटिरीश्वरो मे ॥ १७ ॥ ऊरुद्वयं पातु कुबेरमित्रो जानुद्वयं मे जगदीश्वरोव्यात् ॥ जंघायुगं
पुंगवकेतुरव्यात्पादौ ममाव्यात्सुरवंद्यपादः ॥ १८ ॥ महेश्वरः पातु दिनादियामे मां मध्ययामेवतु वामदेवः ॥ त्र्यं
बकः पातु तृतीययामे वृषध्वजः पातु दिनांत्ययामे ॥ १९ ॥ पायान्निशादौ शशिशेखरो मां गंगाधरो रक्षतु मां नि
शीथे ॥ गौरीपतिः पातु निशावसाने मृत्युंजयो रक्षतु सर्वकालं ॥ २० ॥ अंतःस्थितं रक्षतु शंकरो मां स्थाणुः सदा
पातु बहिःस्थितं मां ॥ तदंतरे पातु पतिः पशूनां सदाशिवो रक्षतु मां समंतात् ॥ २१ ॥ तिष्ठंतमव्याद्भुवनैकनाथः पाया
द्व्रजंतं प्रथमाधिनाथः ॥ वेदांतवेद्योवतु मां निषण्णं मामव्ययः पातु शिवः शयानं ॥ २२ ॥ मार्गेषु मां रक्षतु नील
कंठः शैलादिदुर्गेषु पुरत्रयारिः ॥ अरण्यवासादिमहाप्रवासे पायान्मृगव्याध उदारशक्तिः ॥ २३ ॥ कल्पांत
काटोपपटुप्रकोपस्फुटाट्टहासोच्चलितांडकोशः ॥ घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभद्रः ॥ २४

यथावत्कल्पितासनः॥ जितेंद्रियो जितप्राणश्चिंतयेच्छिवमव्ययं॥२॥ हृत्पुंडरीकांतरसंनिविष्टं स्वतेजसा
व्याप्तनभोवकाशं॥ अतींद्रियं सूक्ष्ममनंतमाद्यं ध्यायेत्परानंदमयं महेशं॥३॥ ध्यानावधूताखिलकर्मबंधः
श्चिरंचिदानंदनमग्निचेताः॥ षडक्षरन्यास समाहितात्माशैवेनकुर्यात्कवचेनरक्षां॥४॥ मांपातुदेवोखिलदेव
तात्मासंसारकूपेपतितंगभीरे॥ तन्नामदिव्यंवरमंत्रमूलंधूनोतुमेसर्वमघंहृदिस्थं॥५॥ सर्वत्रमांरक्षतुवि
श्वमूर्तिर्ज्योतिर्मयानंदघनश्चिदात्मा॥ अणोरणीयानुरुशक्तिरेकःसईश्वरःपातुभयादशेषात्॥६॥ यो
भूस्वरूपेणबिभर्तिविश्वंपायात्सभूमेर्गिरिशोष्टमूर्तिः॥ योपांस्वरूपेणनृणांकरोतिसंजीवनंसोवतुमांज
लेभ्यः॥७॥ कल्पावसानेभुवनानिदग्ध्वासर्वाणियोनृत्यतिभूरिलीलः॥ सकालरुद्रोवतुमांदवाग्नेर्वात्या
दिभीतेरखिलाच्चतापात्॥८॥ प्रदीप्तविद्युत्कनकावभासोविद्यावराभीतिकुठारपाणिः॥ चतुर्मुखस्त
त्पुरुषस्त्रिनेत्रःप्राच्यांस्थितोरक्षतुमामजस्रं॥९॥ कुठारवेदांकुशपाशशूलकपालटक्काक्षगुणान्दधानः॥
चतुर्मुखोनीलरुचिस्त्रिनेत्रः॥ पायादघोरोदिशिदक्षिणस्यां॥१०॥ कुंदेंदुशंखस्फटिकावभासोवेदाक्षमा
लावरदाभयांकः॥ त्र्यक्षश्चतुर्वक्त्रउरुप्रभावःसद्योधिजातोवतुमांप्रतीच्यां॥११॥ वराक्षमालाभयटंक
हस्तःसरोजकिंजल्कसमानवर्णः॥ त्रिलोचनश्चारुचतुर्मुखोमांपायादुदीच्यांदिशिवामदेवः॥१२॥ वेदा ॥३॥

भयेष्टांकुशपाशशूलकपालटक्काक्षरशूलपाणिः॥ सितद्युतिःपंचमुखोवतान्मामीशानऊर्ध्वंपरमप्रकाशः॥
॥१३॥ मूर्धानमव्यान्ममचंद्रमौलिर्भालंममाव्यादथभालनेत्रः॥ नेत्रेममाव्याद्भगनेत्रहारीनासांसदारक्षतुवि
श्वनाथः॥१४॥ पायाच्छ्रुतीमेश्रुतिगीतकीर्तिःकपोलमव्यात्सततंकपाली॥ वक्त्रंसदारक्षतुपंचवक्त्रोजिह्वांसदा
रक्षतुवेदजिह्वः॥१५॥ कंठंगिरीशोवतुनीलकंठःपाणिद्वयंपातुपिनाकपाणिः॥ दोर्मूलमव्यान्ममधर्मबाहुर्वक्ष
स्थलंदक्षमखांतकोव्यात्॥१६॥ ममोदरंपातुगिरींद्रधन्वामध्यंममाव्यान्मदनांतकारि॥ हेरंबतातोममपा
तुनाभिंपायात्कटिंधूर्जटिरीश्वरोमे॥१७॥ ऊरुद्वयंपातुकुबेरमित्रोजानुद्वयोमेजगदीश्वरोव्यात्॥ जंघायुगं
पुंगवकेतुरव्यात्पादौममाव्यात्सुरवंद्यपादः॥१८॥ महेश्वरःपातुदिनादियामेपायांमध्ययामेवतुवामदेवः॥ त्र्यं
बकःपातुतृतीययामेवृषध्वजःपातुदिनांतयामे॥१९॥ पायान्निशादौशशिशेखरोमांगंगाधरोरक्षतुमांनि
शीथे॥ गौरीपतिःपातुनिशावसानेमृत्युंजयोरक्षतुसर्वकालं॥२०॥ अंतस्थितंरक्षतुशंकरोमांस्थाणुःसदा
पातुबहिस्थितंमां॥ तदंतरेपातुपतीपशूनांसदाशिवोरक्षतुमांसमंतात्॥२१॥ तिष्ठंतमव्याद्भुवनैकनाथःपाया
द्व्रजंतंप्रथमाधिनाथः॥ वेदांतवेद्योवतुमांनिषण्णंमामव्ययःपातुशिवःशयानं॥२२॥ मार्गेषुमांरक्षतुनील
कंठःशैलादिदुर्गेषुपुरत्रयारिः॥ अरण्यवासादिमहाप्रवासेपायान्मृगव्याधउदारशक्तिः॥२३॥ कल्पांत
काटोपपटुप्रकोपस्फुटाट्टहासोच्चलितांडकोशः॥ घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतुवीरभद्रः॥२४

शिवकव० ॥४॥

यत्सस्वमातंगघटावरूथसहस्रलक्षायुतकोटिभीषणं ॥ अक्षौहिणीनांशतमाततायिनां छिंधंमडाघोर
कुठारधारया ॥२५॥ निहंतदस्युन्प्रलयानलार्चिर्ज्वलत्त्रिशूलंत्रिपुरांतकस्य ॥ शार्दूलसिंहर्क्षवृकादिहिंस्रा
न्संत्रासयत्वीशधनुःपिनाकः ॥२६॥ दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि ॥ उत्पा
ततापविषभीतिसमग्रहार्तिर्व्याधींश्चनाशयतुमेजगतामधीशः ॥२७॥ इत्येतंसकलस्तुत्वा शिवपंचाक्षर
मंत्रमष्टशतंजप्त्वाशैवमुद्रांचप्रदर्श्यततःसहस्रवर्णोक्तिमंत्रजपः ॥ अस्यश्रीशिवकवचस्तोत्रमंत्रस्यऋषभ
योगीऋषिः ॥ शिरसि ॥ अनुष्टादिनानाछंदांसि ॥ मुखे ॥ श्रीसदाशिवोरुद्रोदेवता ॥ हृदये ॥ ॐ बीजायनमः
॥ नाभौ ॥ शक्तयेनमः ॥ गुह्ये ॥ शिकिलकायनमः ॥ पादयोः ॥ श्रीसांबसदाशिवप्रीत्यर्थेजपेविनियोगः ॥ ॥
ॐ नमोभगवतेसदाशिवायसकलतत्वात्मकायसर्वमंत्रस्वरूपायसर्वयंत्राधिष्ठितायसर्वतंत्रस्वरूपायसर्व
तत्वविदूरायब्रह्मरुद्रावतारिणेनीलकंठायपार्वतीमनोहरप्रियायसोमसूर्याग्निलोचनायभस्मोद्धूलितविग्रहा
यमहामणिमुकुटधारिणेमाणिक्यभूषणायसृष्टिस्थितिप्रलयात्मकायरौद्रावतारायदक्षाध्वरविध्वंसका
यमहाकालभेदनायमूलाधारैकनिलयायतत्वातीतायगंगाधरायसर्वदेवादिदेवायषडाश्रयायवे
दांतसारायत्रिवर्गसाधनायानेककोटिब्रह्मांडनायकायनंततक्षककर्कोटकशंखकुलिकपद्ममहापद्म ॥४॥
सष्टनागकुलभूषणायप्रणवस्वरूपायचिदाकाशायाकाशादिकस्वरूपायग्रहनक्षत्रमालिनेसकला

यकलंकरहितायसकललोकैककर्त्रेसकललोकैकभर्त्रेसकललोकैकसंहर्त्रेसकललोकैकगुरवे
सकललोकैकसाक्षिणेसकलनिगमगुह्यायसकलवेदांतपारगायसकललोकैकवरप्रदायसकलला
कैकशंकरायशशांकशेखरायशाश्वतनिजावासायनिराभासायनिरामयायनिर्मलायनिर्लोभायनि
र्मदायनिश्चिंतायनिरहंकारायनिराकुलायनिष्कलंकायनिर्गुणायनिष्कामायनिरूपप्लवायनिरवंधाय
निरंतकायनिष्कारणायनिरातंकायनिष्प्रपंचायनिःसंगायनिर्द्वंद्वायनिराधारायनिरोगायनिष्क्रोधाय
निर्ममायनिष्पापायनिर्भयायनिर्विकल्पायनिर्भेदायनिष्क्रियायनिस्तुलायनिःसंगायनिरंजनाय
निरूपविभवायनित्यशुद्धबुद्धपरिपूर्णसच्चिदानंदाद्वयायपरमशांतस्वरूपायतेजोमयायजयजय
माहारुद्रमहारौद्ररुद्रावतारमहाभैरवकालभैरवकल्पांतभैरवकपालमालाधरखट्वांगखड्ग
चर्मपाशांकुशडमरुकत्रिशूलचापबाणगदाशक्तिभिंडिमालातोमरमुसलमुद्गरप्रासपरशुपट्टीशपरि
घभुशुंडिडीशतघ्नीचक्राद्यायुधभीषणकरसहस्रमुखदंष्ट्राकरालवदनविकटाट्टहासविस्फारितब्रह्मांडमं स्फा
डलनागेंद्रकुंडलनागेंद्रहारनागेंद्रवलयनागेंद्रचर्मधरमृत्युंजयत्र्यंबकत्रिपुरांतकविश्वरूपविरूपा
क्षविश्वेश्वरवृषभवाहनविश्वतोमुखसर्वतोरक्षसर्वतोरक्षमांज्वलज्वलमहामृत्युमपमृत्युभयंनाशय२चो
रभयमुत्सादयोत्सादयविषसर्पभयंशमयशमय२चोरान्मारय२ममशत्रूनुच्चाटयोच्चाटयत्रिशूलेनविदार

शिवकव० य२कुठारेणभिंधि२खड्गेनछिंधि२खट्वांगेनविपोथय२मुसलेननिष्पेषय२बाणैःसंताडय२रक्षांसिभीषयविष
॥ ५ ॥ याशेषभूतानिविद्रावय२कूष्मांडवेतालमारीचब्रह्मराक्षसगणान्संत्रासय२ममाभयंकुरु२वित्रस्तंमामाश्वासया
श्वासयनरकभयान्मामुद्धरोद्धरसंजीवय२क्षुत्तृड्भ्यांमामाप्यायाप्याययदुःखातुरंमामानंदयानंदयशिवकवचे
नमामाच्छादयाच्छादयमृत्युंजयत्र्यंबकसदाशिवनमस्तेनमस्ते॥१०००॥इत्येनंमहामंत्रंसहस्रवर्णाख्यंप्रत्यहंसहस्र
वृत्त्याशतावृत्त्यैकादशावृत्तौवाजप्त्वा॥जपसमाप्तौपूर्ववन्मुद्रांप्रदर्श्यपूर्ववच्छिवपंचाक्षरमंत्रमष्टशतंजप्त्वा॥ऋषभउ
वाच॥इत्येतत्कवचंशैवंवरदंव्याहृतंमया॥सर्वबाधाप्रशमनंरहस्यंसर्वदेहिनां॥२८॥यःसदाधारयेन्मर्त्यःशैवं
कवचमुत्तमं॥नतस्यजायतेक्वापिभयंशंभोरनुग्रहात्॥२९॥क्षीणायुःप्राप्तमृत्युर्वामहारोगहतोपिवा॥सद्यःसु
खमवाप्नोतिदीर्घमायुश्चविंदति॥३०॥सर्वदारिद्र्यशमनंसौमंगल्यविवर्धनं॥योधत्तेकवचंशैवंसदेवैरपिपूज्य
ते॥३१॥महापातकसंघातैर्मुच्यतेचोपपातकैः॥देहांतेमुक्तिमाप्नोतिशिववर्मानुभावतः॥३२॥त्वमपिश्रद्ध
यावत्सशैवंकवचमुत्तमं॥धारयस्वमयादत्तंसद्यःश्रेयोमवाप्स्यसि॥३३॥सूतउवाच॥इत्युक्त्वाऋषभोयोगीत
स्मैपार्थिवसूनवे॥ददौशंखंमहानादंखड्गंचारिनिषूदनं॥३४॥पुनश्चभस्मसंमंत्र्यतदंगंपरितस्पृशत्॥गजा
नांषट्सहस्रस्यद्विगुणस्यबलंददौ॥३५॥भस्मप्रभावात्संप्राप्तबलैश्वर्यधृतिस्मृतिः॥सराजपुत्रःशुशुभेश ॥५॥
रदर्कइवश्रिया॥३६॥तमाहप्रांजलिंभूयःसयोगीनृपनंदनं॥एषखड्गोमयादत्तस्तपोमंत्रानुभावितः॥३७॥

शितधारमिमंखड्गंयस्मैदर्शयसेस्फुटं॥सद्योम्रियतेशत्रुःसाक्षान्मृत्युरपिस्वयं॥३८॥अस्यशंखस्यनिर्ह्रा
दंयेशृण्वंतितवाहिताः॥तेमूर्छिताःपतिष्यंतिन्यस्तशस्त्राविचेतनाः॥३९॥खड्गशंखाविमौदिव्यौपरसैन्यविनाश
नौ॥आत्मसैन्यस्वपक्षाणांशौर्यतेजोविवर्धनौ॥४०॥एतयोश्चप्रभावेनशैवेनकवचेनच॥द्विषट्सहस्र
नागानांबलेनमहतापिच॥४१॥भस्मधारणसामर्थ्याच्छत्रुसैन्यंविजेष्यसि॥प्राप्यसिंहासनंपित्र्यंगोप्तासिपृ
थिवीमिमां॥४२॥इतिभद्रायुषंसम्यगनुशास्यसमातृकं॥ताभ्यांसंपूजितःसोथयोगीस्वैरगतिर्ययौ॥४३॥
॥इत्यादिसमाप्यंतंफलश्रुतिसकृत्पठित्वा॥सकृद्विभूतिमभिमंत्र्य॥श्रीसांबशिवायजपंवेद्य॥गुह्यातिगुह्यगोप्
त्रीत्वंगृहाणस्मत्कृतंजपं॥सिद्धिर्भवतुमेदेवत्वत्प्रसादान्महेश्वर॥पूर्वोक्तप्रकारेणपंचोपचारपूजामानसीवा
विधाय॥उत्तरषडंगंन्यासः॥तद्रूपत्वेनसंभावयेत्॥न्यूनंवाप्यतिरिक्तंवायन्मयामोहतःकृतं॥सर्वंतदस्तुसं
पूर्णंत्वत्प्रसादान्महेश्वर॥यस्यस्मृत्या०यदक्षर०यत्कृतंजपपूजादिविदितंपरमेश्वर॥मोक्षापवादसिध्यर्थंगृ
हाणपरमेश्वर॥जपपूजादिकंदेवयत्कृतंत्वदनुग्रहात्॥तेनश्रीभगवान्रुद्रःप्रीयतांपरमेश्वर॥अपराधस०
भूमौदखिलपादानांभूमिदेवावलंबनं॥त्वयिजातापराधानांत्वमेवशरणंमम॥१॥नापयोनिसहस्रेषुये
पुत्र— —जाम्यहं॥तावत्त्वंप्रीतिभावेनदेहेस्मिन्संनिधोभव॥इतिप्रार्थयेत्॥इतिजपविधिः॥अथकाम

शिवकव० ॥९॥ नापरत्वेजपसंख्यामह ॥पुत्रार्थेएकविंशतितनमध्येलक्षंजपेत ॥कन्यार्थेलक्षद्वयंधनार्थिलक्षदशकं॥रोगनाशा
र्थंपंचलक्षंशिरोरागादिपंचदिनमध्येलक्षजपेत् ॥ माहारोगेनुएकादशदिनमध्येएकादशलक्षंजपेत्॥शूलेलक्
ष्वष्यर्थेषट्लक्षं॥आयुर्वध्यर्थेदशलक्षं॥विद्याकामस्तुलक्षत्रयं॥अत्रचकाम्यलघुभावेनजपसंख्यासहस्रा
युतलक्षदशलक्षादिवोध्यायहभूतब्रह्मराक्षसवेतालशाकिनीडाकिनीपिशाचादिविविधपीडानिरसनार्थंएकविं
शतिदिनमध्येएकादशलक्षएकादशसहस्रंवाजपेत्॥अथवाएकादशदिनपर्यंतंप्रत्यहंअष्टोत्तरशतावृत्त्याजप
त्॥जपसमाप्तिपर्यंतंयजमानःसाचार्यर्त्विकसहितःब्रह्मचर्यंचरेत्हविष्यान्नंभुंजीत॥इतिश्रीस्कंदपुराणेब्र
ह्मोत्तरखंडेसहस्राक्षरशिवकवचपुरश्चरणविधिशिवचर्मकथनंनामद्वादशोध्यायः॥श्रीसांबसदाशिवार्पण
मस्तु॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

॥छ॥